दिनाङ्क :-21.02.2026

प्रात: - 06:55

<u>पी. एम. ब्राज़िल द्विपक्षः</u>

प्रधानमन्त्री नरेन्द्रमोदी ब्राज़िल-देशस्य राष्ट्रपतिना लुयिज् इनासियो लूला डा सिल्वा इत्यनया सह अद्य नवदेहल्यां द्विपाक्षिक सम्मेलनं विधास्यति। उभौ नेतारौ द्विपाक्षिकसम्बन्धानां समग्रतया समीक्षां करिष्यतः। बहुपक्षीय-मञ्चेषु सहकारः, बहुपक्षवादस्य परिष्कारः, वैश्विक-शासनं, दक्षिण-विश्वसम्बद्धविषयाः इत्यादीनां परस्पर-हितेन सह क्षेत्रीय-वैश्विक-विषयाणां विषये अपि द्वयोः नेत्रोः वैचारिक- आदानप्रदानम् भविष्यति।

<u>प्रधानमंत्री द्विपक्षीय</u>

नवदिल्ल्यां इण्डिया-ए. आई. इम्पैक्ट्-समिट्-2026 इत्यनेन सहैव प्रधानमन्त्री श्रीमोदी लिच्टेन्स्टैन्-देशस्य राजकुमारः अलोयिस्, स्लोवाक्-गणराज्यस्य राष्ट्रपतिः पीटर् पेलेग्रिनि, श्रीलङ्कादेशस्य राष्ट्रपतिः अनुरा कुमार दिसानायके, मारीशस्-देशस्य प्रधानमन्त्रीना डा. नवीन्चन्द्र रामगुलाम इत्येतैः सह द्विपाक्षिकसम्मेलनम् अकरोत्। संयुक्तराष्ट्रसङ्घस्य महासचिवेन आन्टोनियो गुटेरस् इत्यनेन च सह मेलनसमये, प्रधानमन्त्री मोदी संयुक्तराष्ट्रसङ्घस्य परिष्कारविषये, विशेषतः ग्लोबल्-साउथ इत्यस्मै महत्वदानाय वैचारिक- आदानप्रदानम् अकरोत्।

<u>अमित शाह असमः</u>

केन्द्रीय-गृह-मन्त्री अमितशाहः अद्य गुवाहाटी-नगरे केन्द्रीय-आरक्षी-बलस्य स्थापना-दिवस-समारोहे-भागं संगृह्य दशम असम-पुलिस-बटालियन् इत्यस्य शिलान्यासं करिष्यति। प्रथमवारं सी. आर. पी. एफ. इत्यस्य वार्षिक-स्थापना-दिवस-कार्यक्रमः असम-राज्ये, पूर्वोत्तर-प्रदेशे च आयोज्यते।

<u>विदेश मन्त्रालयस्य वक्तव्यः</u>

विदेशमन्त्रालयः अवदत् यत् भारत-अमेरिका-देशौ परस्परं लाभप्रद- व्यापारसमन्वयं अन्तिमं कर्तुं कार्यं कुर्वन्तौ स्तः इति। ह्यः नवदेहल्यां प्रसारमाध्यमान् सम्बोधयन् विदेशमन्त्रालयस्य प्रवक्ता रणधीर् जैसवालः अवदत् यत् मुख्य-वार्ताकारस्य नेतृत्वे एकं प्रतिनिधिदलम् अग्रिमसप्ताहे अमेरिकादेशं गमिष्यतीति।

<u>वैष्णव एआई-इम्प्याक्ट् समिट्-</u>

एआई-इम्पैक्ट समिट् 2026 इति सम्मेलनस्य समापनम् ह्यः नवदेहल्याः भारतमण्डपम् इत्यत्र भारतस्य रेस्पोन्सिबल्-एआई-विजन इत्यस्य प्रबलेन वैश्विक-समर्थनेन सह अभवत्। नवदेहल्यां समापन-पत्रकारसम्मेलनं सम्बोधयन् इलेक्ट्रानिक्स् अथ सूचनाप्रसारण-मन्त्री अश्विनी वैष्णवः अवदत् यत् ए. आई. इम्पैक्ट शिखरसम्मेलनं अनेकेषु क्षेत्रेषु महत्साफल्यं प्राप्नोदिति। श्रीवैष्णवः अवदत् यत्, आर्टिफिसियल् इन्टेलिजेन्स इत्यस्य क्षेत्रे महत्त्वपूर्णाः सर्वे प्रमुखाः देशाः, इण्डिया एआई इम्पैक्ट् समिट् 2026 घोषणापत्रे हस्ताक्षरितवन्तः। मन्त्री अवदत् यत् सप्ततितः अधिकाः देशाः पूर्वमेव घोषणापत्रे हस्ताक्षराणि कृतवन्तः, एषा सङ्ख्या अशीति पारं गमिष्यतीति अपेक्ष्यते। परन्तु अद्य इण्डिया-ए. आई. इम्पैक्ट-एक्सपो इत्यस्य अन्तिमः दिवसः अस्ति। प्रदर्शकेभ्यः, नवान्वेषकेभ्यः, अभ्यागतेभ्यश्च सर्वकारः एकदिवसं यावत् प्रदर्शन्याः विस्तारं कृतवान्। प्रातः सपादनववादनतः सायं षड्वादन- पर्यन्तं उद्घाटयिष्यते च।

## प्रधानमंत्री फाक्स्कान्

प्रधानमन्त्री नरेन्द्रमोदी अद्य वीडियो कान्फ्रेन्सिङ्ग इति माध्यमेन उत्तरप्रदेशस्य यमुना-द्रुतमार्ग-औद्योगिक-विकास-प्राधिकरणे एच्. सि. एल्.-फाक्स्कान् संयुक्त-उद्यम-परियोजनायाः शिलान्यास-समारोहे भागं ग्रहीष्यति। इयं परियोजना देशीय-विनिर्माण-क्षमतानां सुदृढीकरणाय, आयात-अवलंबनम् न्यूनीकर्तुं, स्थितिस्थापक-वैश्विक-आपूर्तिशृङ्खलानां निर्माणाय च सर्वकारस्य प्रयत्नैः सह सम्बद्धम् अस्ति।

## प्रधानमन्त्री मन की बातः

प्रधानमन्त्री नरेन्द्रमोदी श्वः प्रातः एकादश-वादने आकाशवाणी इत्यत्र मन की बात् इत्यस्मिन् कार्यक्रमे देशविदेशवासिभिः जनैः सह स्वविचारान् व्यञ्जयिष्यति। इदं मासिकस्य आकाशवाणी-कार्यक्रमस्य एकत्रिंशदधिकैकशततमं प्रकरणं भविष्यति। हिन्दी-प्रसारणानन्तरं तत्क्षणमेव आकाशवाण्यां क्षेत्रीयभाषास्वपि कार्यक्रमस्य प्रसारणं भविष्यति।